# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची

## प्रथम सावधिक परीक्षा 2021-2022 माडल प्रश्नपत्र सेट - 2

| कक्षा - 10 | विषय - संस्कृत | समय - 1 घंटा 30 मिनट | पूर्णांक - 40 |
|---|---|---|---|

### खण्ड 'क' - 'अपठित अवबोधनम्'

निर्देश: - अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि विकल्पेभ्य: शुद्धंविकल्पं चित्वा लिखत-

सर्वेभ्यः जलं ददामि अहम् अत: जना: माम् मेघ: जलद: वारिद: पयोद: इति नामभि: अपि जानन्ति। सागर: मम जन्मस्थानं गगनं मम गृहं धरा मम गंतव्यम् अस्ति। विद्युत मां प्रकाशयति। पवन: स्वांके लालयति। बाला: मां दृष्ट्वा हृष्यन्ति। जना: प्रसीदन्ति। कृषका: मोदन्ते मयूरा: च नृत्यन्ति। तापेन व्याकुल धरायाः पिपासा मया एव शाम्यते। अहम् एव सर्वप्राणिनां जीवनम् अस्मि।

1. उपरि लिखिते अनुच्छेदे क: वक्ता ?

(क) मेघ: (ख) मयूर: (ग) जन: (घ)पवन:

2. क: मेघं लालयति ?

(क) माता (ख) पिता (ग) पवन: (घ)पयोद:

3. मेघस्य जन्मस्थानं किम् ?

(क) नदी (ख) सागर: (ग) गृहम् (घ) आकाश:

4. "जीवानाम्" इत्यर्थे गद्यांशे क: शब्द: प्रयुक्त: ?

(क) मानवानाम् (ख) प्राणिनाम् (ग) ग्रहाणाम् (घ) पायोदानाम्

5. "तापेन" इति पदे का विभक्ति: ?

(क) द्वितीया (ख) तृतीया (ग) चतुर्थी (घ) पञ्चमी

### खण्ड 'ख' - 'पठित अवबोधनम्'

निर्देश: - अधोलिखितानां प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत –

6. चक्रं कथं चलति ?

[क] तीव्रम् [ख] मन्दम् [ग] शकटम् [घ] वक्रम्

7.भृशं दूषितं किम् अस्ति?

[क] नगरम्  [ख] ग्रामम्  [ग] वायुमण्डलम्  [घ] भोजनम्

8. लतानां माला कीदृशी भवेत्?

[क] रमणीया  [ख] हरितानाम्  [ग] तरूणाम्  [घ] कुसुमम्

9. लतातरूगुल्माः कुत्र न पिष्टाः भवन्तु ?

[क] वृक्षे  [ख] निसर्गे  [ग] प्रस्तरतले  [घ] कामये

10. बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता ?

[क] पित्रा  [ख] मात्रा  [ग] पुत्रद्वयेन  [घ] मित्रेण

11. भयग्रस्तं व्याघ्रं दृष्ट्वा कः अवदत् ?

[क] सिंहः [ख] व्याघ्रः [ग] श्रृगालः [घ] भल्लूकः

12. जम्बुककृतोत्साहः व्याघ्रः पुनः कुत्र अगच्छत् ?

[क] नगरम् [ख] गृहम्  [ग] ग्रामम् [घ] काननम्

13. कीदृशः व्याघ्रः नष्टः ?

[क] मूर्खः  [ख] बुद्धिमान् [ग] भयाकुलचित्तः  [घ] चतुरः

14. कस्य आयास जननं कर्म व्यायामः कथ्यते ?

[क] शरीरस्य  [ख] व्यायामस्य [ग] मानवस्य  [घ] दुःखस्य

15. गात्राणां कान्तिः कथं भवति ?

[क] विद्याध्ययनेन  [ख] व्यायामेन  [ग] सुखेन [घ] दुःखेन

16. व्यायामः केषु ऋतुषु कर्तव्यः ?

[क] ग्रीष्म  [ख] वर्षा  [ग] शरद्  [घ] सर्वेषुऋतुषु

17. प्रथमं मनुष्यः कस्य हितैषी भवेत् ?

[क] परेषां  [ख] सर्वेषां  [ग] आत्मनः  [घ] कस्यापि न

18. 'इन्द्रः' इति पदस्य पर्यायपदं किम् ?

[क] शक्रः [ख] पुत्रः [ग] मरूतः [घ] वरूणः

19. कुत्र जलोपप्लवः सञ्जातः ?

[क] सरोवरे [ख] ग्रामे [ग] नगरे [घ] सर्वत्र

20. 'जनकस्य' इति पदे का विभक्तिः ?

[क] तृतीया [ख] चतुर्थी [ग] पञ्चमी [घ] षष्ठी

21. 'दीनस्य पुत्रस्य' इत्यनयोः पदयोः विशेषणपदं किम् ?

[क] दीनस्य [ख] पुत्रस्य [ग] दीनाय [घ] पुत्रः

निर्देशः – अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां समासं/ विग्रहं वा विकल्पेभ्यः चित्वा लिखत –

22. शिशवः सचित्रं पुस्तकं द्रष्टुम् इच्छन्ति।

[क] चित्रं च [ख] चित्रस्य अभावः [ग] चित्रस्य समीपम् [घ] चित्रेण सहितम्

23. यः परिश्रमं करोति तस्य कार्यं निर्विघ्नं सफलं भवति।

[क] विघ्नैः सहितम् [ख] विघ्नानां पश्चात्

[ग] विघ्नानाम् अभावः [घ] विघ्नम् अनतिक्रम्य

24. मयूरः राष्ट्रपक्षी कथ्यते।

[क] राष्ट्राणां पक्षी [ख] राष्ट्रस्य पक्षी [ग] राष्ट्रे पक्षी [घ] राष्ट्राय पक्षी

25. राजपुत्रः भवनात् निर्गच्छति।

[क] राजस्य पुत्रः [ख] राजाय पुत्रः [ग] राज्ञः पुत्रः [घ] राज्ञे पुत्रः

26. तस्य पितरौ पूजनीयौ स्तः।

[क] मातृ च पितृ च [ख] माता च पिता च

[ग] मातरौ च पितरौ च [घ] माता च पितरौ च

निर्देशः – अधोलिखितानां रेखाङ्कितानां पदानां सन्धिं /विच्छेदं वा विकल्पेभ्यः चित्वा लिखत –

27. सूर्य + उदयः प्राणिजीवनाय अत्यावश्यकम् अस्ति।

[क] सूर्यदयः [ख] सूर्वोदयः [ग] सूर्येदयः [घ] सूर्योदयः

28. हिमालयः नग + अधिराजः कथ्यते

[क] नागाधिराजः [ख] नगाधिराजः [ग] नगअधिराजः [घ] नागेधिराजः

29. सः अध्ययने तत् + लीनः अस्ति।

[क] तत्लीनः [ख] तन्लीनः [ग] तम्लीनः [घ] तल्लीनः

30. गायकः गायनं करोति।

[क] गे + अकः [ख] गै + अकः [ग] गाय + अकः [घ] गाय + कः

31. प्रत्येकं छात्राः ध्यानेन पाठं पठन्तु।

[क] प्र + त्येकम् [ख] प्रत्य + एकम् [ग] प्रति + एकम् [घ] प्रत्येक + म्

## खण्ड “ग” - अनुप्रयुक्तव्याकरणम्

निर्देशः – अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां शुद्धं प्रत्ययं विकल्पेभ्यः चित्वा लिखत-

32. सः इदं कार्यं कुर्वन् पठति।

(क) क्त्वा (ख) तुमुन् (ग) शतृ (घ) शानच्

33. सा गृहं गतवती।

(क) क्तवतु (ख) तुमुन् (ग) शतृ (घ) शानच्

34. तेन संस्कृतं पठितः।

(क) क्तवतु (ख) तुमुन् (ग) शतृ (घ) क्त

35. मोहनः पुस्तकम् आदाय पठति।

(क)क्त्वा (ख) तुमुन् (ग) ल्यप् (घ) शानच्

36. सः पुस्तकं <u>पठित्वा</u> खेलिष्यति।

(क) क्त्वा (ख) तुमुन् (ग) ल्यप् (घ) शानच्

निर्देशः – अधोलिखितेषु वाक्येषु प्रदत्तविकल्पेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत-

37. छात्रा: ------- कोलाहलं कुर्वन्ति।

(क) शनैः (ख) उच्चै: (ग) विना ( घ) पुरा

38. कच्छप: ------- चलति।

(क) शनैः-शनैः (ख) उच्चै: (ग) विना ( घ) पुरा

39. अधुना रात्रिकाल: गृहात्-------- मा गच्छ।

(क) शनैः (ख) बहि: (ग) विना ( घ) पुरा

40.अहं-------- विद्यालयं न गामिष्यामि।

(क) ह्यः (ख) श्वः (ग) विना (घ)पुरा

----------------